# RudrakShajabala Upanishad

# રુદ્રાક્ષજાબાલોપનિષત્

## Document Information

Text title : Rudraakshajabala Upanishad

File name : rudrakshajabala.itx

Category : upanishhat, shiva

Location : doc_upanishhat

Author : Vedic tradition

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Description-comments : 88 / 108; Sama Veda - shaiva upanishad

Latest update : Apr. 3, 2000

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 1, 2025

*sanskritdocuments.org*

# રુદ્રાક્ષજાબાલોપનિષત્

રુદ્રાક્ષોપનિષદ્વેદ્યં મહારુદ્રતયોજ્જ્વલમ્ ।
પ્રતિયોગિવિનિર્મુક્તશિવમાત્રપદં ભજે ॥

ૐ આપ્યાયન્તુ મમાઙ્ગાનિ વાક્પ્રાણશ્ચક્ષુઃ
શ્રોત્રમથો બલમિન્દ્રિયાણિ ચ ॥ સર્વાણિ સર્વં બ્રહ્મોપનિષદં
માહં બ્રહ્મ નિરાકુર્યાં મા મા બ્રહ્મ નિરાકરોદનિરાકરણમ-
સ્ત્વનિરાકરણં મેસ્તુ તદાત્મનિ નિરતે ય ઉપનિષત્સુ ધર્માસ્તે મયિ
સન્તુ તે મયિ સન્તુ ॥ ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

હરિઃ ૐ ॥ અથ હૈનં કાલાગ્નિરુદ્રં ભુસુણ્ડઃ પપ્રચ્છ કથં
રુદ્રાક્ષોત્પત્તિઃ । તદ્ધારણાત્કિં ફલમિતિ । તં હોવાચ
ભગવાન્કાલાગ્નિરુદ્રઃ । ત્રિપુરવધાર્થમહં નિમીલિતાક્ષોઽભવમ્ ।
તેભ્યો જલબિન્દવો ભૂમૌ પતિતાસ્તે રુદ્રાક્ષા જાતાઃ ।
સર્વાનુગ્રહાર્થાય તેષાં નામોચ્ચારણમાત્રેણ
દશગોપ્રદાનફલં દર્શનસ્પર્શનાભ્યાં દ્વિગુણં
ફલમત ઊર્ધ્વં વક્તું ન શક્નોમિ । તત્રૈતે શ્લોકા ભવન્તિ ।
કસ્મિંસ્થિતં તુ કિં નામ કથં વા ધાર્યતે નરૈઃ ।
કતિભેદમુખાન્યત્ર કૈર્મન્ત્રૈર્ધાર્યતે કથમ્ ॥ ૧॥

દિવ્યવર્ષસહસ્રાણિ ચક્ષુરુન્મીલિતં મયા ।
ભૂમાવક્ષિપુટાભ્યાં તુ પતિતા જલબિન્દવઃ ॥ ૨॥

તત્રાશ્રુબિન્દવો જાતા મહારુદ્રાક્ષવૃક્ષકાઃ ।
સ્થાવરત્વમનુપ્રાપ્ય ભક્તાનુગ્રહકારણાત્ ॥ ૩॥

ભક્તાનાં ધારણાત્પાપં દિવારાત્રિકૃતં હરેત્ ।
લક્ષં તુ દર્શનાત્પુણ્યં કોટિસ્તદ્ધારણાદ્ભવેત્ ॥ ૪॥

તસ્ય કોટિશતં પુણ્યં લભતે ધારણાન્નરઃ ।

લક્ષકોટિસહસ્રાણિ લક્ષકોટિશતાનિ ચ ॥ ૫॥

તજ્જપાલ્લભતે પુણ્યં નરો રુદ્રાક્ષધારણાત્ ।
ધાત્રીફલપ્રમાણં યચ્છ્રેષ્ઠમેતદુદાહૃતમ્ ॥ ૬॥

બદરીફલમાત્રં તુ મધ્યમં પ્રોચ્યતે બુધૈઃ ।
અધમં ચણમાત્રં સ્યાત્પ્રક્રિયૈષા મયોચ્યતે ॥ ૭॥

બ્રાહ્મણાઃ ક્ષત્રિયા વૈશ્યાઃ શૂદ્રાશ્ચેતિ શિવાજ્ઞયા ।
વૃથા જાતાઃ પૃથિવ્યાં તુ તજ્જાતીયાઃ શુભાક્ષકાઃ ॥ ૮॥

શ્વેતાસ્તુ બ્રાહ્મણા જ્ઞેયાઃ ક્ષત્રિયા રક્તવર્ણકાઃ ।
પીતાસ્તુ વૈશ્યા વિજ્ઞેયાઃ કૃષ્ણાઃ શૂદ્રા ઉદાહૃતાઃ ॥ ૯॥

બ્રાહ્મણો બિભૃયાચ્છ્વેતાત્રક્તાત્રાજા તુ ધારયેત્ ।
પીતાન્વૈશ્યસ્તુ બિભૃયાત્કૃષ્ણાઞ્છૂદ્રસ્તુ ધારયેત્ ॥ ૧૦॥

સમાઃ સ્નિગ્ધા દૃઢાઃ સ્થૂલાઃ કણ્ટકૈઃ સંયુતાઃ શુભાઃ ।
કૃમિદષ્ટં ભિન્નભિન્નં કણ્ટકૈર્હીનમેવ ચ ॥ ૧૧॥

વ્રણયુક્તમયુક્તં ચ ષડ્રુદ્રાક્ષાણિ વર્જયેત્ ।
સ્વયમેવ કૃતં દ્વારં રુદ્રાક્ષં સ્યાદિહોત્તમમ્ ॥ ૧૨॥

યત્તુ પૌરુષયત્નેન કૃતં તન્મધ્યમં ભવેત્ ।
સમાન્સ્નિગ્ધાન્દૃઢાન્સ્થૂલાન્ક્ષૌમસૂત્રેણ ધારયેત્ ॥ ૧૩॥

સર્વગાત્રેણ સૌમ્યેન સામાન્યાનિ વિચક્ષણઃ ।
નિકષે હેમરેખાભા યસ્ય રેખા પ્રદૃશ્યતે ॥ ૧૪॥

તદક્ષમુત્તમં વિદ્યાત્તદ્ધાર્યં શિવપૂજકૈઃ ।
શિખાયામેકરુદ્રાક્ષં ત્રિશતં શિરસા વહેત્ ॥ ૧૫॥

ષટ્ત્રિંશતં ગલે દધ્યાત્બાહોઃ ષોડશષોડશ ।
મણિબન્ધે દ્વાદશૈવ સ્કન્ધે પઞ્ચશતં વહેત્ ॥ ૧૬॥

અષ્ટોત્તરશતૈર્માલામુપવીતં પ્રકલ્પયેત્ ।
દ્વિસરં ત્રિસરં વાપિ સરાણાં પઞ્ચકં તથા ॥ ૧૭॥

સરાણાં સપ્તકં વાપિ બિભૃયાત્કણ્ઠદેશતઃ ।
મુકુટે કુણ્ડલે ચૈવ કર્ણિકાહારકેઽપિ વા ॥ ૧૮॥

કેયૂરકટકે સૂત્રં કુક્ષિબન્ધે વિશેષતઃ ।
સુપ્તે પીતે સદાકાલં રુદ્રાક્ષં ધારયેન્નરઃ ॥ ૧૯॥

ત્રિશતં ત્વધમં પઞ્ચશતં મધ્યમમુચ્યતે ।
સહસ્રમુત્તમં પ્રોક્તમેવં ભેદેન ધારયેત્ ॥ ૨૦॥

શિરસીશાનમન્ત્રેણ કણ્ઠે તત્પુરુષેણ તુ ।
અઘોરેણ ગલે ધાર્યં તેનૈવ હૃદયેઽપિ ચ ॥ ૨૧॥

અઘોરબીજમન્ત્રેણ કરયોર્ધારયેત્સુધીઃ ।
પઞ્ચાશદક્ષગ્રથિતાન્વ્યોમવ્યાપ્યપિ ચોદરે ॥ ૨૨॥

પઞ્ચ બ્રહ્મભિરઙ્ગૈશ્ચ ત્રિમાલા પઞ્ચ સપ્ત ચ ।
ગ્રથિત્વા મૂલમન્ત્રેણ સર્વાણ્યક્ષાણિ ધારયેત્ ॥ ૨૩॥

અથ હૈનં ભગવન્તં કાલાગ્નિરુદ્રં ભુસુન્ડઃ પપ્રચ્છ
રુદ્રાક્ષાણાં ભેદેન યદક્ષં યત્સ્વરૂપં યત્ફલમિતિ ।
તત્સ્વરૂપં મુખયુક્તમરિષ્ટનિરસનં કામાભીષ્ટફલં
બ્રૂહીતિ હોવાચ । તત્રૈતે શ્લોકા ભવન્તિ ॥

એકવક્ત્રં તુ રુદ્રાક્ષં પરતત્ત્વસ્વરૂપકમ્ ।
તદ્ધારણાત્પરે તત્ત્વે લીયતે વિજિતેન્દ્રિયઃ ॥ ૧॥

દ્વિવક્ત્રં તુ મુનિશ્રેષ્ઠ ચાર્ધનારીશ્વરાત્મકમ્ ।
ધારણાદર્ધનારીશઃ પ્રીયતે તસ્ય નિત્યશઃ ॥ ૨॥

ત્રિમુખં ચૈવ રુદ્રાક્ષમગ્નિત્રયસ્વરૂપકમ્ ।
તદ્ધારણાચ્ચ હુતભુક્તસ્ય તુષ્યતિ નિત્યદા ॥ ૩॥

ચતુર્મુખં તુ રુદ્રાક્ષં ચતુર્વક્ત્રસ્વરૂપકમ્ ।
તદ્ધારણાચ્ચતુર્વક્ત્રઃ પ્રીયતે તસ્ય નિત્યદા ॥ ૪॥

પઞ્ચવક્ત્રં તુ રુદ્રાક્ષં પઞ્ચબ્રહ્મસ્વરૂપકમ્ ।
પઞ્ચવક્ત્રઃ સ્વયં બ્રહ્મ પુંહત્યાં ચ વ્યપોહતિ ॥ ૫॥

ષડ્વક્ત્રમપિ રુદ્રાક્ષં કાર્તિકેયાધિદૈવતમ્ ।
તદ્ધારણાન્મહાશ્રીઃ સ્યાન્મહદારોગ્યમુત્તમમ્ ॥ ૬॥

મતિવિજ્ઞાનસમ્પત્તિશુદ્ધયે ધારયેત્સુધીઃ ।
વિનાયકાધિદૈવં ચ પ્રવદન્તિ મનીષિણઃ ॥ ૭॥

સપ્તવક્ત્રં તુ રુદ્રાક્ષં સપ્તમાધિદૈવતમ્ ।
તદ્ધારણાન્મહાશ્રીઃ સ્યાન્મહદારોગ્યમુત્તમમ્ ॥ ૮॥

મહતી જ્ઞાનસમ્પત્તિઃ શુચિર્ધારણતઃ સદા ।
અષ્ટવક્ત્રં તુ રુદ્રાક્ષમષ્ટમાત્રાધિદૈવતમ્ ॥ ૯॥

વસ્વષ્ટકપ્રિયં ચૈવ ગઙ્ગાપ્રીતિકરં તથા ।
તદ્ધારણાદિમે પ્રીતા ભવેયુઃ સત્યવાદિનઃ ॥ ૧૦॥

નવવક્ત્રં તુ રુદ્રાક્ષં નવશક્ત્યધિદૈવતમ્ ।
તસ્ય ધારણમાત્રેણ પ્રીયન્તે નવશક્તયઃ ॥ ૧૧॥

દશવક્ત્રં તુ રુદ્રાક્ષં યમદૈવત્યમીરિતમ્ ।
દર્શનાચ્છાન્તિજનકં ધારણાન્નાત્ર સંશયઃ ॥ ૧૨॥

એકાદશમુખં ત્વક્ષં રુદ્રૈકાદશદૈવતમ્ ।
તદિદં દૈવતં પ્રાહુઃ સદા સૌભાગ્યવર્ધનમ્ ॥ ૧૩॥

રુદ્રાક્ષં દ્વાદશમુખં મહાવિષ્ણુસ્વરૂપકમ્ ।
દ્વાદશાદિત્યરૂપં ચ બિભર્ત્યેવ હિ તત્પરમ્ ॥ ૧૪॥

ત્રયોદશમુખં ત્વક્ષં કામદં સિદ્ધિદં શુભમ્ ।
તસ્ય ધારણમાત્રેણ કામદેવઃ પ્રસીદતિ ॥ ૧૫॥

ચતુર્દશમુખં ચાક્ષં રુદ્રનેત્રસમુદ્ભવમ્ ।
સર્વવ્યાધિહરં ચૈવ સર્વદારોગ્યમાપ્નુયાત્ ॥ ૧૬॥

મદ્યં માંસં ચ લશુનં પલાણ્ડું શિગ્રુમેવ ચ ।
શ્લેષ્માતકં વિડ્વરાહમભક્ષ્યં વર્જયેન્નરઃ ॥ ૧૭॥

ગ્રહણે વિષુવે ચૈવમયને સંક્રમેઽપિ ચ ।
દર્શેષુ પૂર્ણમાસે ચ પૂર્ણેષુ દિવસેષુ ચ ।
રુદ્રાક્ષધારણાત્સદ્યઃ સર્વપાપૈઃ પ્રમુચ્યતે ॥ ૧૮॥

રુદ્રાક્ષમૂલં તદ્બ્રહ્મા તન્નાલં વિષ્ણુરેવ ચ ।
તન્મુખં રુદ્ર ઇત્યાહુસ્તદ્બિન્દુઃ સર્વદેવતાઃ ॥ ૧૯॥ ઇતિ ॥

અથ કાલાગ્નિરુદ્રં ભગવન્તં સનત્કુમારઃ પપ્રચ્છાધીહિ
ભગવન્રુદ્રાક્ષધારણવિધિમ્ । તસ્મિન્સમયે નિદાઘ-
જડભરતદત્તાત્રેયકાત્યાયનભરદ્વાજકપિલવસિષ્ઠ-

પિપ્પલાદાદયશ્ચ કાલાગ્નિરુદ્રં પરિસમેત્યોચુઃ । અથ
કાલાગ્નિરુદ્રઃ કિમર્થં ભવતામાગમનમિતિ હોવાચ ।
રુદ્રાક્ષધારણવિધિં વૈ સર્વે શ્રોતુમિચ્છામહ ઇતિ । અથ
કાલાગ્નિરુદ્રઃ પ્રોવાચ । રુદ્રસ્ય નયનાદુત્પન્ના રુદ્રાક્ષા
ઇતિ લોકે ખ્યાયન્તે । અથ સદાશિવઃ સંહારકાલે સંહારં
કૃત્વા સંહારાક્ષં મુકુલીકરોતિ । તન્નયનાજ્જાતા રુદ્રાક્ષા
ઇતિ હોવાચ । તસ્માદ્રુદ્રાક્ષત્વમિતિ કાલાગ્નિરુદ્રઃ પ્રોવાચ ।
તદ્રુદ્રાક્ષે વાગ્વિષયે કૃતે દશગોપ્રદાનેન યત્ફલમવાપ્નોતિ
તત્ફલમશ્નુતે । સ એષ ભસ્મજ્યોતી રુદ્રાક્ષ ઇતિ । તદ્રુદ્રાક્ષં
કરેણ સ્પૃષ્ટ્વા ધારણમાત્રેણ દ્વિસહસ્રગોપ્રદાનફલં
ભવતિ । તદ્રુદ્રાક્ષે કર્ણયોર્ધાર્યમાણે એકાદશસહસ્રગોપ્રદાનફલં
ભવતિ । એકાદશરુદ્રત્વં ચ ગચ્છતિ । તદ્રુદ્રાક્ષે શિરસિ
ધાર્યમાણે કોટિગોપ્રદાનફલં ભવતિ । એતેષાં સ્થાનાનાં
કર્ણયોઃ ફલં વક્તું ન શક્યમિતિ હોવાચ । ય ઇમાં રુદ્રાક્ષજાબાલોપનિષદં
નિત્યમધીતે બાલો વા યુવા વા વેદ સ મહાન્ભવતિ । સ ગુરુઃ સર્વેષાં
મન્ત્રાણામુપદેષ્ટા ભવતિ એતૈરેવ હોમં કુર્યાત્ । એતૈરેવાર્ચનમ્ ।
તથા રક્ષોઘ્નં મૃત્યુતારકં ગુરુણા લબ્ધં કણ્ઠે બાહૌ
શિખાયાં વા બધ્નીત । સપ્તદ્વીપવતી ભૂમિર્દક્ષિણાર્થં નાવકલ્પતે ।
તસ્માચ્છ્રદ્ધયા યાં કાઞ્ચિદ્ગાં દદ્યાત્સા દક્ષિણા ભવતિ ।
ય ઇમામુપનિષદં બ્રાહ્મણઃ સાયમધીયાનો દિવસકૃતં પાપં
નાશયતિ । મધ્યાહ્નેઽધીયાનઃ ષડ્જન્મકૃતં પાપં નાશયતિ ।
સાયં પ્રાતઃ પ્રયુઞ્જાનોઽનેકજન્મકૃતં પાપં નાશયતિ ।
ષટ્સહસ્રલક્ષગાયત્રીજપફલમવાપ્નોતિ । બ્રહ્મહત્યાસુરાપાન-
સ્વર્ણસ્તેયગુરુદારગમનતત્સંયોગપાતકેભ્યઃ પૂતો ભવતિ ।
સર્વતીર્થફલમશ્નુતે । પતિતસંભાષણાત્પૂતો ભવતિ ।
પઙ્ક્તિશતસહસ્રપાવનો ભવતિ । શિવસાયુજ્યમવાપ્નોતિ । ન ચ
પુનરાવર્તતે ન ચ પુનરાવર્તત ઇત્યોંસત્યમિત્યુપનિષત્ ॥

ૐ આપ્યાયન્તુ મમાઙ્ગાનિ વાક્પ્રાણશ્ચક્ષુઃ શ્રોત્રમથો
બલમિન્દ્રિયાણિ ચ ॥ સર્વાણિ સર્વં બ્રહ્મોપનિષદં માહં
બ્રહ્મ નિરાકુર્યાં મા મા બ્રહ્મ નિરાકરોદનિરાકરણમ-
સ્ત્વનિરાકરણં મેસ્તુ  તદાત્મનિ નિરતે ય ઉપનિષત્સુ ધર્માસ્તે

મયિ સન્તુ તે મયિ સન્તુ ॥ ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

ઇતિ રુદ્રાક્ષજાબાલોપનિષત્સમાપ્તા ॥

Encoded by Sunder Hattangadi

---

*RudrakShajabala Upanishad*

pdf was typeset on April 1, 2025

Please send corrections to *sanskrit@cheerful.com*